किरातार्जुनीयस्य घण्टापथस
माख्यव्याख्यासहितस्य तृती
यचतुर्थपंचमसर्गाः

५।।

२८

१

ॐ श्रीगणेशाय नमः ॐ द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकं कालापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृत-
मिति अथ त्रिभिः श्लोकैर्मुनिं विशेषयन् चतुर्भिः कालापकमाह ततइति ततः शरच्चन्द्रकराभिरामैरुत्सर्पि-
भिः प्रांशुमिवांशुजालैः बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहं १ ततउपविष्टानन्तरं धर्मात्म-
जो युधिष्ठिरः शरच्चन्द्रकराइवाभिरामैराह्लादकैरित्यर्थः उत्सर्पिभिरूर्ध्वप्रसारिभिरित्यर्थः अंशुजालैः प्रांशुमु-
न्नतं सन्तमिव स्थितमित्युत्प्रेक्षा पुनः आनीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः गौरादित्वान्ङीष् जटाः बिभ्राणं
धारयन्तं अतएव तडित्वन्तं विद्युद्युक्तमम्बुवाहमिव स्थितमित्युत्प्रेक्षा १ प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जना-
तिगेन प्रसह्य चेतस्सु समासजन्तमसंस्तुतानामपि भावमार्द्रम् २ पुनः समग्रां संपूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं
संपदं दधतं अतएव जनमतिगच्छतीति जनातिगेन लोकातिशायिना अतोमत्यापि चरूपतरतितत्तीया वपुः प्र-
कर्षेण आकारसंपत्त्या असंस्तुतानामपरिचितानामपि स्वसोदरेयमित्यज्ञानानामपीत्यर्थः संस्तवः स्यात्परिचय इत्यमरः चेतः-
सु चित्तेषु आर्द्रं स्निग्धं भावमभिप्रायं प्रसह्य बलात् समासजन्तं लगयन्तमिति यावत् दंशसञ्जस्वञ्जां शपीत्युपधालोपः १
प्रसन्नाकारे पुरुषे सर्वो विस्निह्यतीति भावः २ अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिं माधुर्यविस्रम्भविशे-
षभाजा कृतोपसंभाषमिवेक्षितेन ३ पुनरनुद्धतः आकारो यस्य सो ऽनुद्धताकारस्तत्त्वं तेन प्रकटयन्तं आकृतिरेवास्य
चित्तस्थितिं कथयतीत्यर्थः तथा शान्ताकारत्वेन लिङ्गेन अन्तःकरणस्य वृत्तिं विविक्तां पूतां शान्तामिति यावत् विवि-
क्तौ पूतविजनौ विविक्तावित्यमरः तन्वन्तं प्रकटयन्तं आकृतिरेवास्य चित्तस्थितिं कथयतीत्यर्थः पुनर्माधुर्यं निसर्गसौम्य-
ता विस्रम्भो विश्वासस्तयोर्विशेषमतिशयं भजतीति तथोक्तेन ईक्षितेन दर्शनेनैव कृताउपसंभाषा आभाषणं येन तं
मिव स्थितमित्युत्प्रेक्षा दृष्टिविशेषेणैवोपसंभाषमाणमिव स्थितमित्यर्थः काशिकायान्तूपसंभाषा उपसान्त्व-
नमिति भाष्यसनादिसूत्रे ३ धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनां हेतुं तदभ्यागमने परीप्सुः

कि॰
ट॰ टी॰
।

सुतोपविष्टं तनिमाव भावे ४ कालापकं ॥ पुनः धर्मं निबध्नंतीति धर्मनिबंधिनी नामग्निहोत्रादिधर्मप्रतिपादिकाना मे
नःप्रणत्नामचच्छिदा क्विप् श्रुतीनां वेदानां श्रुतिः स्त्री वेद आम्नाय इत्यमरः प्रहृतिप्रभवं सुखेनतुपविष्टं मुनिं तदा
भ्यागमने हेतुं कारणं परीप्सुर्जिज्ञासुः धर्मात्मजः आमेतोः सर्वतात्तुप्रत्ययः आप्ज्ञप्यृधामादिकारः अत्रलोपोभ्या
सस्येत्यभ्यासलोपः आवभाषे उवाचेत्यर्थः ४ अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजा सवित्री तुल्या भव
द्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ५ हे ऋषे अनाप्तपुण्योपचयैरलब्धसुकृतसंग्रहैर्दुरापा दुर्लभा फ
लस्य सवित्री श्रेयस्करीत्यर्थः निर्धूतरजा हतरजोगुणा अन्यत्र निरस्तधूलिश्च रजो रजो गुणे च धूलौ परागोवर्त्तयो
रपीति शाश्वतः एषा भवद्दर्शनसंपत् संपत्तिलाभ इति यावत् संपदादिभ्यः क्विपो भावार्थत्वात् वीतबलाहकायाः
निर्मेघाया दिवोन्तरिक्षस्य संबंधिन्या वृष्टेस्तुल्येत्युपमालंकारः अनभ्रवृष्टिवदतर्कितोपपन्नं भवद्दर्शनं सर्वथा
कस्यचिच्छ्रेयसो निदानमित्यर्थः वारि वहतीति बलाहकः पृषोदरादित्वात्साधुः ५ अद्य क्रियाः कामदुघाः क्रतू
नां सत्याशिषः संप्रति भूमिदेवाः आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम् ६ अद्य क्रतूनां क्रि
याः अनुष्ठानानि कामान्दुहंतीति कामदुघाः फलदा इत्यर्थः दुहः कब्घश्चेति कप्रत्ययः घ आदेशः संप्रति भू
मिदेवा ब्राह्मणाः द्विजात्यग्रजन्मभूदेववाडवा विप्रश्च ब्राह्मणोसौ इत्यमरः सत्याशिषो जाताः ब्राह्मणाशिषोपि
सफलिता इत्यर्थः कुतः यद्यतः कारणात्त्वय्यागते सति त्वदागमननिमित्तेनेत्यर्थः अस्मीत्यहमर्थेऽव्ययं
अस्मीत्यस्मदर्थानुवादे अहमर्थे तिङन्तप्रतिरूपकमव्ययम् दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुंदरी
नास्मि दूये इति प्रयोगश्च आसंसृतेरासंसारात् यावत्संसारमित्यर्थः अभिविधावाङ् विकल्पात्समासः ज
गत्सु बहुमानपात्रं जातः सकलं सत्कर्मफलं भूतं त्वदागमनं येन मे जगन्मान्यते इति भावः ६ श्रियं विकर्षत्यपहं
त्यघानि श्रेयः परिस्नौति तनोति कीर्तिं संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ७ आत्मयोनेर्ब्रह्म

नतिदानमपि तु ४

१

म्मा ४

णस्त्वलोकगुरोस्तथामोघं सफलं संदर्शनं श्रियं विकर्षत्याकृष्य ददाति अवद्यानि दुःखानि अपहरति नाशयति
अंहोऽघः खव्यसनेष्वघमित्यमरः श्रेयः पुरुषार्थं तत्कृतं च परिरक्षति स्रवति कीर्त्तिं तनोति किं बहुना किं
न धत्ते किं न करोति अपि तु सर्वं करोतीत्यर्थः ७ श्च्योतन्मयूखेपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चे
तः समुज्झितस्तानि वियोगखेदं त्वत्संनिधावुच्छ्वसतीव चेतः ८ हे मुने श्च्योतन्मयूखेपि सुधास्रा(
विणि चंद्रेपि विषयेन निर्वृतिं सुधास्पदिकरे इतियावत् नद्वृत्तं प्राप्तं नञर्थस्य नञ्ञाहृत्स सुपे
तिसमासः मे चेतः त्वत्संनिधौ निर्वृतिं सुखमेति तथा चेतः समुज्झितस्तानि वियोगदुःखं न्यक्कृत्य बं(
धुविरहदुःखं उच्छ्वसतीवानुपरोधेन प्राणितीवेत्युत्प्रेक्षा पूर्वार्द्धे तु निर्वृतिकारणे सत्यपि तदानीं हि ति
कथनाद्विशेषोक्तिः तदुक्तं तत्सामग्र्यामनिर्हेतिर्विशेषोक्तिर्निगद्यते ८ निरास्पदं प्रश्नकुतूहलित्वम
स्मास्वधीनं किमु निःस्पृहाणां तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ९ प्रश्नकुतू
हलित्वं निरास्पदं आगमप्रयोजनप्रश्नो निरास्पदं निराश्रयं आस्पदं प्रतिष्ठायामिति निपातः प्रश्नानव
काशे हेतुमाह निःस्पृहाणां युष्मादृशामस्मास्वधीनं आयत्तं किमु न किंचिदस्मत्तो लभ्यमित्यर्थः आधा
रत्वविवक्षायां सप्तमी तथापि कल्याणकरीं अस्मद्धितकरेत्यर्थः निःस्पृहप्रवृत्तेः परार्थत्वादिति(
भावः कृत्वोऽङ्के त्विप्यादिना टच्प्रत्यये ङीप् अतस्ते गिरं श्रोतुमिच्छा मां मुखं वागस्यास्तीति मुखरः मुख
रो निरंकुशभाषी खमुखस्तु दुर्मुखे इति भोजः अमुखरः मुखरः संपद्यते तथालंकरोति वाचालं करोति दुर्मुखे मुख
राबद्धमुखौ वाचि इत्यमरः ततः च्विप्रत्ययः मुखरीकरोति व्यापारयतीत्यर्थः निःस्पृहस्यापि ते वाक्यमस्मद्धित
करत्वाच्छ्रोतव्यमित्यर्थः ९ इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ उदारचेता गिरमि
त्युदारां द्वैपायनेनाभिदधे नरेंद्रः १० इतीत्यमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारु यथा तथोक्तवानुदार

कि॰
टी॰
२

चेतामहामनानेवेदंद्रौद्वैपायनेनव्यासेन द्वीपमयनंतस्यातंजन्मभूमिर्यस्यसद्वीपायनः सएवद्वैपायनोव्यासस्तेन
मुन्नादिभिरनिरस्वार्थेगाममन्मयः नापद्यार्थेनयादिभ्यः फक्कुनेश्चैवपाठात् बाधितार्थत्वाच्च जयोपपन्नोम
नःसमाधायजयसिद्धिमपेत्स्यर्थः इतिवत्समानमकाराम्तुदारामर्थवतींगिरमभिदधेउक्तः इष्टादित्वा
दप्रधानेकर्मणिलिट् प्रधानकर्मण्याख्येयेलादीनांद्विकर्मणांम्प्रधानेदुहादीनांगापतिकर्त्तृश्चद्विकर्मक
इतिवचनात् ९ अतोतावत्स्वस्यमाध्यस्थ्यभंगदोषमनेनपरिहरति ॥ विचीयतांजन्मवतामलक्ष्मी
यशोवतंसामुभयत्रभूतिं अभ्यर्हिताबंधुजनात्स्वरूपाहतिर्विशेषेणतपोधनानां १० अलक्ष्मीगुर्वी
वोतोगुणवचनाद्ङीष् यशोवतंसांकीर्तिभूषणां उभयत्रइहामुत्रभूतिंश्रेयश्चिचीयतांचेतत्संग्रहि(
तमिच्छतां चिनोतेःसनंताल्लटस्प्रत्ययः जन्मवतांशरीरिणांबंधुविषयेवत्सरूपाद्वस्वविधाहतिर्भव
हारःअभ्यर्हिताउचितातपोधनानांममाशीविशेषेणनियमेनाभ्यर्हिता ११ तथापिनिघ्नंनृपतावकै
तावकीनैःप्रह्वीकृतंमेहृदयंगुणौघैः वीतस्पृहाणामपिमुक्तिभाजांभवंतिभव्येषुहिपक्षपाताः १२ (
तथापिवल्पवृत्तौचित्तेपितेन्नृपतावकीनैस्त्वदीयैः युष्मदस्मदोरन्यतरस्यांखञ्चेतिखञ्प्रत्ययः तवमम
मकावेकवचनेइतितवकममकादेशः गुणौघैःसमूहैः प्रह्वीकृतंआवर्जितंमेहृदयंनिघ्नंत्वदाय
त्तं अधीनोनिघ्नआयत्तइत्यमरः ननुनिःस्पृहस्यकोयंपक्षपातइत्यत्राह वीतेति वीतस्पृहाणांविर(
क्तानांमुक्तिभाजांमुमुक्षूणामपीत्यर्थः भवंतीतिभव्याःसाधवः भव्यगेयेत्यादिसूत्रेणकर्त्तरिनिपा
तः तेषुविषयेपक्षपाताःस्नेहाःभवंति ननुसाधुत्वमेवमहतांमाध्यस्थ्यभंजकइतिभावः १२ अथ
त्वपसस्तुगुणावत्तांप्रकटयितुंतत्रत्याश्चर्यमुद्घाटयति ॥ सुतानयूयंकिमुतस्यराज्ञःसुयो
धनंवानगुणैरतीताः यस्मात्त्वत्तःसहस्राद्बलात्कामोहंविधत्तेविषयाभिलाषः १३ स्वयंतस्य

राज्ञो धृतराष्ट्रस्य सुताः न किमुत तात एवेत्यर्थः गुणैः शान्त्यादिभिः सुयोधनं नातीताः नातिक्रान्ताः वा अतिक्रान्ता एवेत्यर्थः क
र्मकिं: अतस्तत्त्वमगणात्वं वा त्यागरेत युष्मास्तनात्तीत्यर्थः उपालंभे कारणमाह परति यो धृतराष्ट्रो वो युष्मा
न्नसः तथा निःकारणमेव प्रसन्नवान् यदि वयं पुत्रामुणाधिकाः स्मः कथमस्मान्नीदृक्पार् बलाद्धेति विषयाभिलाषो
भोगतृष्णा बलाद्धा बलादेव वास्माद्धि कल्पोपनमयो रेवार्थपि सप्तृच्चयरूति विश्वः मोहमविवेकं विधत्ते विषया
भिलाषादतिरिक्तोनकश्चित्सागेरे तु रस्तीत्यर्थः अत एव कारणेन कार्य समर्थनरूपोर्थान्तरन्यासः १३ अथ
राज्ञो साहदर्शनेन पात्रोहीनिंदर्शयति जहान्नेनेनं कथमर्थसिद्धिः संप्राप्य करणादिषु तिष्ठतेयः असाधुयोगाहि जि
यानराया: प्रमाथिनीनां विपदां पदानि १४ एवं धृतराष्ट्रं अर्थसिद्धिः कथं न जहात जहात्येवेत्यर्थः प्रैषातिसर्गप्राप्त
कालेषु प्रकृत्यस्येति प्राप्तकाले लोट् हानिकालस्य प्राप्तत्वमित्यर्थः अतः यो धृतराष्ट्रः संप्राप्य संदिग्धकरणादि
षु तिष्ठते करणादीनु धर्मत्रिणाः संदिग्धानिर्णीतत्वेन यो वलंबतइत्यर्थः प्रकाशनस्थेयाख्ययोश्चेति स्थेयाख्याया
मात्मनेपदं तिष्ठत्यस्मिन्निति स्थेयो विवादपदनिर्णेता इति काशिकायां तथाहि असाधुयोगात् दुर्जनसंसर्गात् जयां
नरायाजयावचनकाः किंच प्रमाथिनीनामुन्मूलनशीलानां विपदां पदानि स्थानानि पदं व्यवसितत्राणस्थानल
क्ष्माङ्घ्रि वस्तुषित्यमरः न केवलमर्थघातिनः किन्त्वनर्थकारिणश्चेत्यर्थः धृतराष्ट्रोपि दुर्जनविधेयत्वाद्धितं नप
तीतिभावः १५ एवं धृतराष्ट्रोरनर्थं सूचयित्वा राज्ञो धर्मसिद्धिं सूचयति पथ्यश्रुतायां समितौ विशीर्णां धर्म्यां प्रधानेन
धुरं चिराय त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु १६ विशीर्णां समितौ सभायां सभा समितिः संस
दस्यमरः पथ्यश्रुतायां समां मार्गाच्युतायां समाजमात्मनोऽङ्गः प्राशनस्य स्त्री त्वदर्शनादाह संगीकृतवृत्तमित्य
र्थः चिराय धर्म्यां धर्मादनपेतायां धर्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः धुरं भारं प्रधानेन कृत्स्नापि धर्माद
चलतेत्यर्थः त्वया विपत्सु दुःखेष्वपि अविपत्तिरविनाशि अत एव रम्यं गुणेषु शान्त्यादिषु विषयेषु परमुत्कृष्टं प्रेम आवि

कृतं दुःसहमपि सोढवतां त्वया साधु कृतमिति भावः ॥ २५ ॥ विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥ २६ ॥ किंच ग्राम एवैका न्याह त्रिर्यस्य तस्य प्रपये ।
पतापिनरत्यर्थः भवतश्छलेन कपटेन आत्मने हितः आत्मनीनः स न भवतीत्यनात्मनीनः स्वस्यैवानर्थहेतु
मित्यर्थः आत्मविश्वजनभोगोत्तरपदात्ख इति खप्रत्ययः विध्वंसमपकारं विधाय कृत्वा प्रकाशितः प्रख्या
पितः त्वन्मतिशीलयोस्तव प्रज्ञास्वभावयोः सारः प्रकर्षो यैस्ते तथोक्ताः ते विद्विषः कृतोपकारा इव उपकृत
वन्त इव वर्तन्त इति शेषः अपकारोऽप्युपकारायैव संवृत्तः तद्दौर्जन्यं तव सौजन्यं च जगति सुव्यक्तमासीदित्यर्थः
विद्यमानस्यापि सुजनस्य गुणाः चंदनदारुण इव परिभव एव प्रचुरीभवंतीति भावः ॥ २६ ॥ अथ प्रयोजनमा
ह लब्धा धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतंत्रा हि रणे जय
श्रीः ॥ २७ ॥ तव त्वयेत्यर्थः क्तस्यानां कर्तरि वेति षष्ठी धरित्री विक्रमेण लब्धा प्राप्ता स्वया विक्रमाद्धिना न च स्वलमे
त्याह विपक्षश्च शत्रुरपि वीर्यास्त्रबलैः वीर्यं शौर्यं अस्त्राणि पाशुपतादीनि बलानि सैन्यानि तैर्वीर्यास्त्रबलैः ज्याया
न्प्रशस्यः त्वत्तोऽधिक इति यावत् ज्य चेति ज्यादेशः अतः प्रकर्षाय आधिक्याय विधिरुपायो विधेयः कर्तव्यः कुतः
हि यस्मात् रणे जयश्रीः प्रकर्षतंत्रा प्रकर्षप्रधाना प्रकर्षायत्तेत्यर्थः तंत्रं प्रधाने सिद्धान्ते इत्यमरः बलिन एव
जयो न दुर्बलस्येति भावः ॥ २७ ॥ अथ त्रिरित्यादिना श्लोकचतुष्टयेन विपक्षस्य ज्यायस्त्वं वर्णयति । त्रिःसप्तकृ
त्वो जगतीपतीनां हंता गुरुर्यस्य स जामदग्न्यः वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानां ॥ २८ ॥ त्रिरा
वृत्तान् सप्त वारान् त्रिःसप्तकृत्वः एकविंशतिवारानित्यर्थः त्रिःसप्तशब्दयोः सुप्सुपेति समासः संख्यायाः क्रिया
भ्यावृत्तिगणने कृत्वसुच् जगतीपतीनां भूपतीनां हंता गुरुश्चास्त्रवेदोपदेष्टा यस्य उपरानंतनापेक्षते जमदग्नेरप
त्यं पुमान् जामदग्न्यः गर्गादिभ्यो यञ् इति यञ् यस्य भीष्मस्य वीर्यावधूतो विक्रमाभिभूतः अंबिकास्वयंवर इत्यर्थः

तदाभंगप्राप्तिसमये गुणानां शौर्यादीनां प्रकर्षमतिशयं आधारस्वरूपं आश्रयाधीनं विवेदजज्ञे स्वविद्यायाः शिष्ये भीष्मे
स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः स्मेतिपादपूरणे स्मपादपूरणे इत्यनार्थेति विश्वः १८ यस्मिन्ननैश्वर्यकृत
व्यलीकः पराभवं प्राप्तवतां न कोपि ध्रुवं धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः १९ कुलकम् (
यस्मिन्भीष्मे विषये अनैश्वर्यस्य भावः अनैश्वर्यं असामर्थ्यं नञः स्वचीतेत्र तत्कालानि पुराणानि निविकल्पा (
नञः पूर्वपदस्य वृद्धभावः तेन कृतं व्यलीकं यस्य सः जनितं वैलक्ष्यं पङ्कः स्ववैलक्ष्यव्यलीकेष्विति यादवः अत
कोपि प्राप्तवत भीष्मस्य संग्रामरणात्वादं न कोपि पराजित इत्यास्ते किन्तु तान्नत्यभिभावः स भीष्मो रणे धनुर्धुन्वन्
आस्फालयन् कस्य मनो भयैकप्रवणं कोन्तुवं शिवभागवनवत्समासः न कुर्यात् सर्वस्यापि मनसि भयं कु
र्यादेवेत्यर्थः १९ कुलकम् सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः परिस्फुरल्लोलशिखाग्रजिह्वं ज
गज्जिघत्सन्तमिवांतवह्निम् २० आजौ रणे इषुसंहतीर्बाणसंघान्सृजन्तं वर्षन्तं कोपज्वलितं अत एव परिस्फुरन्त्यो
लोलाश्च शिखा धनुषवजिह्वा यस्य तं तथोक्तं जगज्जिघत्सन्तं अत्तुमिच्छन्तं अदेः सनन्ताल्लटः प्रत्ययः लुङ्सनोर्घ
स्लृ इति घस्लादेशः अन्तेवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वः युष्माकं मध्ये चकः सहेत सोढुं शक्नुयात् न को
पीत्यर्थः सकिलिङ् चेति शक्यार्थे लिङ् २१ निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम् असंस्तुतेषु प्र
सभं भयेषु जायेत मृत्योरपि पक्षपातः २१ संरम्भेण कोपेन निरस्तं माजितं धैर्यं निर्विकारचित्तत्वं येन तथोक्तं आ
कारेणैव परधैर्यापहारिणमित्यर्थः आराधितजामदग्न्यम् पूजितभार्गवं जामदग्न्यादधिगतास्त्रमिति समित्य
र्थः राधेयं कर्णं स्त्रीभ्यो ढक् निरीक्ष्य स्थितस्येति शेषः मृत्योरप्यसंस्तुतेष्वपरिचितेषु संस्तवः स्यात्परिच
य इत्यमरः भयेषु प्रसभं पक्षपातः परिचयो जायेत मृत्युरप्यस्माद्बिभीयादित्यर्थः किमुतान्य इति भावः संभा
वनायां लिङ् अत्र जनिक्रियापेक्षया न संभवात् निरीक्ष्येति क्त्वार्थे दृश्यः समर्थनीयः प्रधानोपसर्जनाभावः स्वप्रयो

नि

कि॰
त्र॰टी॰
५

जकरतिव्यक्तिविवेककारः अत्रभवत्संबंधपरिहितस्पृमरयोर्भयसंबंधाभिधानादसंबंधेसंबंधरूपातिशयोक्तिरलंकारः
२१ अथानंतरंकरणीयमुपदिशन्नागमनेप्रयोजनंयुग्मेनाह यथासमासादितसाधनेनसुदुश्चरामाचरतात्तपस्याम् ।
एतेदुरापंसमवाप्यवीर्यमुन्मूलितारःकपिकेतनेन २२ यथाविधयाकरणेनसुदुश्चरामतिदुष्करांतपस्यांतपश्चर्यां
कर्मणोरोमंथतपोभ्यांवर्तिचरोरितिकाङ् अप्रत्ययादितिस्त्रियामप्रत्ययः आचरतापशुपतिंप्रतितपःकुर्वतेत्यर्थः
अतएवसमासादितंप्राप्तंसाधनंपाशुपतास्त्ररूपंयेनतेनकपिकेतनेनकपिचिह्नंयस्यतेनार्जुनेनेत्यर्थः दुरापमन्यदुर्ल
भंवीर्यंतेजःसमवाप्यएतेपूर्वोक्ताभीमादयःउन्मूलितारःउन्मूलयिष्यंतेउन्मूलयंते एपतात्कर्मणिलुट् अ
त्रविकल्पादिडागमेपितस्यासिद्धवदत्राभादितिणिलोपस्यासिद्धत्वाभावेरनिटीतिणिलोपः तन्निमित्तस्याविधिनिषेधात् ।
तदुक्तं चिणवदिड्युक्तस्तेनस्वंवृद्धत्वंदीर्घश्चयोमितांवाचिण्णीतिरुहतासिद्धिस्तेनमेलुप्यतेणिनि पश्चात्त्व ।
मितोविधातास्मि २२ महत्त्वयोगायमहामहिम्नामाराधनींतांनृपदेवतानां दातुंप्रदानोचितभूरिधाम्नी
मुपागतःसिद्धिमिवास्मिविद्यां २३ हेनृपमहत्त्वयोगायप्रकर्षलाभायमहामहिम्नांमहानुभावानांदेवता
नामिंद्रादीनांआराध्यतेऽनयेत्याराधनींतांप्रसादयित्रीमित्यर्थः करणेल्युडितिङीप् भूरिधाम्नींमहाप्रभावां
धामदेहोगृहेरश्मौस्थानेजन्मप्रभावयोरितिविश्वः अन्यत्राउपधालोपोनाम्नतरस्यामितिङीप् विद्यांमंत्रम
त्ररूपांसिद्धिंसाक्षात्कार्यसिद्धिमिवेतिविपर्ययाभ्रमोवोक्तिः हेप्रदानोचितदानपात्रभूतफलभोक्तापदस्य ।
पात्रत्वोक्तिःदातुमुपागतोस्मि २३ इत्युक्तवंतंव्रजसाधयेतिप्रमाणयन्वाक्यमजातशत्रोः प्रसेदि
वांसंतमुपाससादवसन्निवांतेविनयेनजिष्णुः २४ इत्युक्तवंतंप्रसेदिवांसंप्रसन्नं भाषायांसदवसश्रुवः इति
क्वसुः तंमुनिंजिष्णुर्जयनशीलोयोऽर्जुनः ग्लाजिस्थश्चग्स्नुरितिग्स्नुप्रत्ययः व्रजसाधययद्यन्तुतिष्ठत्येवम
जातशत्रोर्धर्मराजस्यस्वयमद्वेषराग्यशीलत्वादियंसंज्ञा वाक्यंप्रमाणयन्अवर्जनीयंकुर्वन्नुदादिरुक्तासन्निमित्यर्थः

अंतेवसन्छात्रस्व छात्रांतेवासिनोशिष्यइत्यमरः विनयेनानीकृत्येनउपासत्सादसमीपंप्राप २४ निर्यायविद्याथ
दिनादिरम्याद्बिंबादिवार्कस्यमुखान्महर्षेः पार्थाननंवह्निकणावदाता दीप्तिःस्फुरत्पद्ममिवाभिपेदे २५ अथवह्नि
कणावदातास्फुलिंगवज्ज्वलादेवतासान्निध्यादितिभावः विद्याऽथेत्थंमंत्ररूपादिनादिरम्यात्प्रभातभास्करादर्कस्य
बिंबादिवमहर्षेर्व्यासस्यमुखान्निर्यायनिर्गत्य यातेःसमासेनपूर्वोक्तोल्यप् दीप्तिरर्कदीधितिःस्फुरद्विकसत्पद्म
मिवपार्थाननमर्जुनस्यमुखमभिपेदेप्राप २५ योगंचतंयोग्यतमायतस्मैतपःप्रभावाद्वितताररद्यः येनास्य
तत्वेषुकृतेवभासेसमुन्निमिलेवचिरायचक्षुः २६ योग्यतमायतस्मैपार्थायतंवक्ष्यमाणमहिमानंयोगंध्यानवि
धिंच योगःसंहननोपायध्यानसंगतियुक्तिष्वित्यमरः तपःप्रभावात्सपोवितताररद्दौचिरकालग्राह्यमपीतिभावः
येनयोगेनतत्वेषुप्रकृतिमहदादिषु तथाचप्रकृतिर्महान् अहंकारोमनःपंचतन्मात्राणिपंचबुद्धींद्रियाणि
पंचकर्मेंद्रियाणिपंचमहाभूतानीत्येतिचतुर्विंशतितत्वानिअवभासेसाक्षात्कारेकृतेसतिअस्यार्जुनस्यचक्षु
र्द्दिचिरायसमुन्निमिलेवउन्मीलितमिवेत्युत्प्रेक्षा योगोयंतस्यार्जुनस्याखिलाज्ञानभंजकत्वात्वभासप्रा
दंधसदृष्टिलाभइवाभवदितिभावः २६ आकारमाशंसितभूरिलाभंदधानमंतःकरणानुरूपं नियोजयिष्य
न्विजयोदयेतंतपःसमाधौमुनिरित्युवाच २७ आशंसितआख्यातोभूरिलाभोऽनेकश्रेयःप्राप्तिर्येनतंतथोक्तंम
ताभावप्रसूचकमित्यर्थः अंतःकरणशाद्गृहेनतद्धृतिठत्साहोलक्षनेतदनुरूपंउत्साहगुणाभ्यापारकत्वमित्यर्थः आ
कारंमूर्तिंदधानंतमर्जुनंमुनिर्विजयोदयेविजयफलकेतपःसमाधौतपोनियमे समाधिर्नियमेध्यानेनिपाते
चसमर्थनेइतिविश्वः नियोजयिष्यन्नियोजयितुंइच्छन्नित्यर्थः लृट्चेतिलृट् लृटःसद्वेतिशतृप्रत्ययः मुनि
रितिवक्ष्यमाणमुवाच २७ अनेनयोगेनविवृद्धतेजानिजांपरस्मैपदवीमयच्छन् समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनां २८ अनेनस्वोपदिष्टेनेत्यर्थः विवृद्धतेजाविवृद्धप्रतापःयोगेनउपायेननिजांपद
वींपरस्मैअयच्छन्नपरस्यअवेशमयच्छन्नित्यर्थः उपात्तशस्त्रोगृहीतायुधएवसन्जपोपवासाभिषवैःस्ना

कि.
स. टी.

5

ध्यायानध्यानस्नानैर्मुनीनामाचारं समाचरन्नतिष्ठ २८ हे तत्र विशेषे तपःसिद्धिः किंपाथायेनैनं निदर्शयन्नाह करिष्यसेय
त्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वा २९ यत्र शि
लोच्चये गोत्रभिदः इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे चारुशिलोच्चयं रम्यशिखरं तं शिलोच्च
यं गिरिं इन्द्रकीलाख्यं अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चया इत्यमरः त्वां एष गुह्यकोयक्षः अनंतरमेवास्य
पुरः प्रादुर्भावादेषइति निर्देशः क्षणान्नेष्यति प्रापयिष्यति २९ इतिब्रुवाणेन नरेंद्रसूनुं महर्षिणा तेन तिरोब
भूवे तं राजराजानुचरोस्य साक्षात् प्रदेशमादेशमिवाधितस्थौ ३० इतीयं महेन्द्रसूनुमर्जुनं ब्रुवाणेन उक्तवतेत्यर्थः
वर्तमानसामीप्ये भूते वर्तमाने यन्प्रत्ययः तिरोधानस्याविलंबनसूचनार्थः तेन महर्षिणा व्यासेन तिरोबभूवे अं
तर्दधे भावेलिट् राजराजो यक्षराजः राजाप्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोरिति विश्वः तस्यानुचरः सेवको य
क्षः यस्य तु नेशादेशः साक्षाद् आज्ञेव स यक्षस्तमर्जुनाधिष्ठितप्रदेशमधितष्ठौ प्राप इत्यर्थः स्थादिष्वभ्यासेन चाभ्यास
स्येति षत्वं ३० कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ इयाय सख्याविव संप्रसादं विश्वासयत्याशु
सतां हि योगः ३१ स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः सन् व्याहृतः सान्त्ववादे उक्त प्रियवचने व्याहारउक्ति ल
पितमित्यमरः जिष्णावर्जुने जातस्पृहो जातानुरागः सख्यौ सुहृदीव अथ मित्रं सखासुहृदित्यमरः संप्रसादं विश्वा
सं इयाय प्राप तथाहि सतां साधूनां योगः संगतिराशु विश्वासयति सामान्येन विशेषसमर्थनरूपोर्थान्तरन्यासः
३१ अथोष्णभासेव सुमेरुकुंजान्विहीयमानानुदयाय तेन बृहद्द्युतीन्दुःखकृतात्मलाभं तमः शनैः पांडुसुतः प्रपेदे
३२ अथोष्णभासा सूर्येण उदयाय पुनरुदयाय विहीयमानान्त्यज्यमानानिति तमः प्रतिकारगोक्तिः बृहद्द्युतीन्सौ
वर्णत्वाद्दीप्यमानानित्यर्थः इति तमः संकोचकारणोक्तिः सुमेरुकुंजानिव स्थितान् सुमेरुयस्तरोः कुंजानां सौ
वर्णद्योतनार्थं तेनार्जुनेनोदयाय श्रेयसे विहीयमानान्बृहद्द्युतीनधिकभङ्गिप्रकाशान् सर्वविद्विषोवरणस्य प्र
योजनं च बृहदिति प्रयोजनसंभवेयं पांडुसुतान्युधिष्ठिरादीन् दुःखेन कष्टेन कृतः आत्मलाभो उत्पत्तिर्येन तत्तथोक्तं
नाः

२४

तेषां विवेकित्वात्कथं चित्सुखोदयमित्यर्थः तमः शोकोंधकारश्च तमोंधकारे स्वर्भानौ तमः शोके गुणांतरे स्तु भयत्राप्यमरः
शानैर्मे संप्रपेदे तेषां विवेकित्वाज्ज्ञातं मिवेतिभावः अत्र तमः श्लिष्टत्वात्श्लेषानुप्राणितेयमुपमा ३२ असंशयालो
चितकार्यत्वं प्रेम्णा समानीयविभज्यमानः तुल्याद्विभागादिवतन्मनो भिदुःखातिभारोपिलघुःसमेते ३३ असं
शयमसंदिग्धंयथातथाआलोचितं किंचावितंयत्कार्यंतेनकार्येणान्येनोनिरस्तः इतिलघुत्वहेतूक्तिः तदविदोषत्राया हि
भोन्यतरस्यामितिनिष्ठानत्वं कार्यगौरवमालोका निरस्तत्वमर्थः तथापिप्रेम्णा आत्मवात्सल्येनकर्त्रासमानीयसमा
नीकृत्यपुनराकृष्यविभज्यमानः समभागीक्रियमाणः तुल्यप्रेम्णा तुल्यदुःखत्वं भवतीतिभावः समुद्र्वोक्तो दुःखमेवाति
भारो दुःखातिभारोपिभ्रातभार्यन्त्रमपि दुःखमित्यर्थः तन्मनोभिस्तेषांचतुर्णांपार्थानां मनोभिस्तुल्याद्विभागादिव
पूर्वोक्तात्प्रेमकृतात्समविभागादिवेत्यर्थः वस्तुतस्तुविवेकादेवेतिभावः पुनर्विभागग्रहणंतत्स्मरहेतुप्रेक्षा
र्थमनुग्रहणमनुवादरूपदोषः लघुमेनेमानितं यथैकोनेकधाविभज्यबहुभिरुह्यमानोमहानपिभारोलघुर्भ
वतीतद्वदित्यर्थः ३३ अथैवंप्रेम्णाप्याकृष्यमाणमपि शोकं विवेकोनिर्जिगायेत्याह ॥ धैर्येणा विश्वासतया महा
र्षस्तीव्रादरातिप्रभवाच्च मन्योः वीर्यं च विद्वत्सु सुतेमघोनः सतेषुनस्थानमवापशोकः ३४ धैर्येणातेषांनिर्वि
रीतोनिर्विकारचित्तत्वेनतथामहर्षेर्व्यासस्यप्रवर्तकस्योक्तिरोषः विश्वासतयाश्रद्धेयवचनत्वेनेत्यर्थः अरातिप्र
भवादरातिहेतुकात्तीव्रात्निविडादसह्यान्मन्योः क्रोधाद्धेतोः तथार्जुनप्रभवंपदविज्ञानादेवेति हेत्वंतरं विशेषणामु
खेनाह मघोनः सुतेर्जुनेवीर्यं च नलोकेत्यादिनाषष्ठीप्रतिषेधः विद्वत्स्वेविदेः शतुर्वावसुरितिविकल्पाद्वस्वादेशः कान्वन्तः
तेषुचतुर्षुपार्थेषु अथवापार्थिवेषु सुशोकः स्थानं स्थितिंनावाप ३४ तान्भूरिधाम्नश्चतुरोपिदूरं विहाययामानि
ववासरस्य एकोचभूतं नदशर्मकृत्संविभावरीधांतमिवाभिपेदे ३५ तान्पार्थानत्युत्कृष्टवत्सुखम् ... शर्मणांतिसु
खातिचेत्यमरः तद्धितदुर्गमशर्मदुःखं नञीतिकर्मसमासः भूरिधाम्नस्तेजस्विनइतिहेतुत्वोक्तिः चतुरस्तान्पार्थान्
वासरस्यभूरिधाम्नश्चतुरोपियामास्त्रहराणिवहूंविहाय यत्एकाएकोचभूतमेकंराजिभ्रांसत्र ... पादयः कृतादि

कि॰
त॰टी॰
6

भिरिति चार्थे कर्मधारयः अएपादित्वकृतिगणइति शाकटायनः कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वांतमिव कृष्णां द्रौपदीं प्रपेद इति ३५ तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मंगलभंगभीरुः अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ३६ सा द्रौपदी विलोकने ऽर्जुनावलोकने अगूढभावा अगूढाभिप्रायापि स्फुटाभिलाषेति यावत् भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजंतुष्विति वैजयंती मंगलभंगभीरुः मंगलहानेर्भीता सती पर्यश्रुणी परितस्स्रुतं बाष्पं वत्तेइत्यर्थः अतएव तुषारलेखाकुलितोत्पलाभे हिमबिंदुसहितेंदीवरसन्निभे इत्युपमालंकारः लोचने मीलयितुं न विषेहे न शशाक अश्रुणो दृष्ट्यावरणात्काले पितन्निपातस्यामंगलत्वात्तन्निर्वर्तकं निमीलनं सा न चकारेत्यर्थः ३७ अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टं मनःप्रसादांजलिना निकामं जग्राह पाथेयमिवेंद्रसूनुः ३८ इंद्रसूनुरर्जुनः क्रियया निर्वृत्तः कृत्रिमः त्रिक्तेः मप्नित्यमिति मप्प्रत्ययः तद्भिन्नः प्रेमैव रसः कृत्रिमेन प्रेमरसेनाभिरामं अन्यत्र प्रेमरसेन मधुरादिना चाभिरामं रामया रमणया ऽर्पितं दत्तं दृष्टिं विलोभयतीति दृष्टिविलोभि दृष्टिप्रियं दृष्टं दर्शनं नपुंसके भावे क्तः मनःप्रसादः प्रसन्नमनइत्यर्थः सोंजलिरिवेत्युपमितसमासः तेन मनःप्रसादांजलिना पथि साधु पाथेयं शंबलमिति पथ्यतिथिस्वपतेर्ढञ् निकाममतिप्रायेण जग्राह रामार्पितं पाथेयं पथिक्षेमाय भवतीत्यागमः ३७ धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिंधुः निरुद्धबाष्पोदयसन्नकंठमुवाच कृच्छ्रादिति राजपुत्री ३८ वनद्विपेन वनगजेनेव ग्रहणात्उद्धेः स्वलघोतनार्थं निदाघसिंधुः ग्रीष्मनदीव निदाघग्रहणं दौर्बल्यघोतनार्थं धैर्यावसादेन धैर्यभ्रंशेन कर्त्री हृतप्रसादा हृतनैर्मल्या क्षोभं गमिता अन्यत्र राजपुत्री क्षत्रियसुता द्रौपदी अतः क्षात्रधर्ममेव वक्ष्यतीति भावः निरुद्धबाष्पोदयं संरुद्धरोदनं सन्नकंठं हीनस्वरं तयोः कृतबहुव्रीह्योः क्रियाविशेषणयोः विशेषणसमासः कृच्छ्रात्कथंचिदिति वक्ष्यमाणमुवाच ३८ मग्नां द्विषच्छद्मनि पंकभूते संभावनां भूतिमिवोद्धरिष्यन् आधिद्विपामातपसां प्रसिद्धेरस्मद्विनामा भृशमुन्मनीभूः ३९ पंकभूते पंकोपमिते भूतं स्या

दौ पिशाचादौ न्याय्ये समोपमानयोरिति विश्वः छिद्यन्त इति शात्रवकपटे मर्माङ्करुद्धानामित्यर्थः संभाव्यतां योग्यतां गौ
रवमिति यावत् भूतिं संपदमिव भूतिर्भस्मनि संपदीत्यमरः उद्दीपयन्नुद्बोधकस्त्वमिति शेषः आधिच्छिदां
दुःखच्छिदां तपःसंपदां प्रसिद्धेः सम्यक् प्रसिद्धिपर्यन्तमस्मद्विनाः अस्माभिर्विनेत्यर्थः पृथग्विनेत्यादिना विकल्पात्
पंचमी भृशं मा उन्मनीभूः अस्मद्विरहदुःखवेदनामाभूदित्यर्थः दौर्मनस्यस्य तपःप्रतिपन्थित्वादिति भावः
माङि लुङ्याशीर्घ्यर्थे लुङ् न माङ्योग इत्यडागमप्रतिषेधः उन्मनाउन्मनाः संपद्यमान उन्मनी अभूततद्भावे च्विः
अरुमनश्चक्षुश्चेतोरहोरजसां लोपश्चेति सकारलोपः अस्यच्वौ ईकारः ३९ अथोत्सुकस्य दाढ्यार्थं तपःसंसा
र्वार्थसिद्धिनिदानमाह यशोधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा निरुत्सुकानामभियोगभा
जां समुत्सुकेवाङ्कमुपैति सिद्धिः ४० यशोधिगन्तुं कीर्तिं लब्धुं सुखलिप्सया सुखं लब्धुमिच्छया वा मनुष्यसंख्याम
नुष्येषु गणनामतिवर्तितुं अतिक्रमितुं वा अमानुष्यकर्म कर्तुमित्यर्थः अभियोगभाजामभिनिवेशवतां
निरुत्सुकानामनुन्मनसां मन्दर्मनायमानानामिति यावत् सिद्धिः सर्वोऽपि यशःसुखाद्यर्थसिद्धिः समुत्सुके
कान्तरक्त कान्तेवाङ्कमुत्संगमुपैति तस्मादस्मद्विरहदुःखमात्र तपःसिद्धेः सोढव्यमिति भावः ४० अथास्य मन्यु
दीपनद्वारा तपःप्रवृत्तिं प्रथमं दर्शयितुं अरिकृतनिकारं वचनचतुर्भिः कालापकेनोद्घाटयति लोकं विधा
त्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु जैत्रमोजः तेजस्विताया विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानं ४१
विधात्रा ब्रह्मणा लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्रस्य क्षत्रियजातेः संबन्धि जयनशीलं जैत्रं तदेव जैत्रं जेतृ
शब्दात्तृन्नन्तात् प्रज्ञादिभ्यश्चेति स्वार्थेऽण्प्रत्ययः ओजो बलं दीप्तिर्वा ओजो बले च दीप्तौ चेति विश्वः तदेव वसु धनं
इति रूपकालंकारः मुष्णन् अपहरन् अरिभिः कृतनिकारस्य ... तान्न तेजः इति भावः किंच विजयैकवृत्तेर्विज
यैकजीवितायाः क्षत्रियस्य विजेतव्यमिति भावः वृत्तिर्वर्तने जीवनेऽप्यमरः तेजस्वितायास्तेजस्विनामित्यर्थः
तेजसः प्राधान्यद्योतनार्थं भावप्रधानो निर्देशः प्रियं प्राणमिव प्राणसममित्यर्थः अभिमानमहंकारं निघ्नन्खं

कि॰
ट॰ टी॰
7

ज्वयन् तेजस्विनां प्राणहानितः प्रायो मानहानिरितिभावः ४१ अधित्येपायसहनं तेजः प्राणात्ययेष्वपि नृपाणां मिस्माह
ब्रीडानतेरात्मजनोपनीतः संशय्यकृच्छ्रेण नृपैः प्रपन्नः वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णं ४२
पुनश्चात्मजनेनोपनीतः प्रापितः इत्यर्थः तथापि संशय्य संदिह्य असंभावितभङ्गेतिभावः ब्रीडानतैर्ज्जुगुप्सितहन्तो
नश्रवणादितिभावः नृपैर्दुर्योधनस्थैः कृच्छ्रेण प्रपन्नः प्राप्तः प्राप्तोऽकार्यकारी चिह्नितस्तत्र इत्यर्थः यः सएवतात्म
पिडः सह किमुतानुभवतामितिभावः इत्येषा पूर्वैर्व्याख्या अन्यथाम याचव्याख्यायते आत्मजनोपनीतः जा
तिकृतः संशय्य कृथमिदमन्याय्यमुपेक्ष्यमिति विचार्य ब्रीडानतेः जनगुप्सितकर्मदर्शनादितिभावः नृपैस्तत्रस्थैः
कृच्छ्रेण प्रपन्नोऽङ्गीकृतः गोत्रकलहेषु माध्यस्थ्ये तूदासितव्यमिति बुद्ध्योपेक्षित इत्यर्थः पक्षद्वयेपि प्रपन्नः प्रपन्न
नेपिनीतत्वपदार्थे निकृतस्य विप्लोषणात् यागहेतुत्वोक्त्या काव्यलिंगमलंकारः पृथिव्यां वितानभूतं उल्लोचोपमि
तं अस्त्री वितानमुल्लोच इत्यमरः दिग्विकीर्णं वितानमपि दिग्तलम्भमितिभावः विततं प्रथितं यशः समूहन्नि
वसंकोचन्निवेत्युत्प्रेक्षा अरातिपरिभूतस्य कुतः कीर्तिरितिभावः ४२ वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूता
मिव संप्रतीतिं कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ४३ पुनश्च वीर्यस्यापि वावदानानि तेषु कृत
तावमर्षः अवदानं कर्म वृत्तमित्यमरः कृताक्रन्दनः पराकृतपराक्रमा इत्यपि प्रसङ्गात्रित्यर्थः अतएव संप्रती
तिं प्रख्यातिं प्रतीतं प्रथितं ख्यातवित्तविज्ञातविश्रुतास्त्यमरः अभूतामविद्यमानामिवेति अतोपसत्त्वमुत्प्रेक्षा
तन्वन्कुर्वन्पुनश्चाह्नो वयोघ्रादिनांतोऽर्कत्विषामिवायतीनामुत्तरकालानां प्रयामक्षयं दैर्घ्यनाशं कुर्वन्तिष्ठोतिष्ठ
र्तीयमुपमा अविनिराकृतस्य कृतः क्रियावस्थानमितिभावः ४३ प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्यः किमु
ताधिकर्तुं नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः ४५ पुनः परैः शत्रुभिरस्मासु प्रसह्य बलात्प्रयु
क्त आचरितो यो निकारः परिभवः केशाम्बराकर्षणादिरूपः स्मर्तुं न शक्यो ऽधिकर्तुमनुभवितुं किमुत यस्य स्मरणा
मपि दुःसहमनुभवस्तु दुःसह इति किमु वक्तव्यमित्यर्थः स निकारस्त्वद्विना त्वया विना पृथग्विनेत्यादिना पंच

मी आर्द्रः सन्नुन्नाशितदम्भिघातात्तरणामहारस्कवचाहि रहस्तः खात्पुनर्नवीभविष्यन्नित्यर्थः उपरुध्यपूनात्कयापिस्तुष्ठकामि
तिभावः इः स्वस्तंभवनं शोषपदार्थं मेहदयं नवीकरिष्यत्याद्रींकरिष्यतित्राणामिवेतिभावः इः खितस्य पुनर्नइः खोपु
चयस्वप्रशान्तप्रायमपिङ्गः स्वहेतं पुनरुद्धाटयतीत्यर्थः अत्रश्लेषादिविशेषणसाम्यात्त्वणाय प्रस्तुतार्थप्रती
तेः समासोक्तिरलंकारः ४५ अपाकलापकं ॥ पुनः प्रकारान्तरेणामतिमुद्दीपयति प्राप्तइत्यादिभिस्तिसृभिस्तत्रव
दसनाराप्रत्यभिज्ञाने हेतुर्भईनं जयं विपिनेष्टि प्राप्तोभिमानव्यसनादसह्याद्दन्तीवदन्तव्यसनाद्विकारैः हि वात्प्र
भावांतविजोरुतेजाः घरट्टनाकीर्णाद्रवादिरक्तः ४६ अभिमानस्य व्यसनात्कृत्यात् व्यसनं विपद्भिः शत्रोदोषेकामजको
पजश्च्यमरः दन्तव्यसनाद्दन्तभङ्गात्प्राप्तःतीवासह्यं विकारं वेदं प्राप्तः अतोनप्रत्यभिज्ञायसद्ग इतिभावः एवमुक्तयाप्यनु
संधेयं पुनश्चहिपात्प्रतापेन प्राप्तृते जसांतरितंनिरस्तहंतरुतेजः प्रजापोयस्यसतथोक्तः अतएव घरट्टनाकी
र्णः घारन्मेघच्छन्नोऽर्क इवादिः प्राप्तस्य प्रवृत्थितस्तद्देवाप्रत्यभिज्ञायमानइत्यर्थः मध्याह्नस्तमेघावरणोपिकथं वि
त्यभिज्ञायते एवेत्याशयेनोक्तमप्रादिरिति ४६ सव्रीडमंदैरिवनिःक्रियत्वान्नात्यर्थमवैरवभासमानः यशः त्वया
द्वीपाजलाभाविभवस्व मन्दमाकारखाभिपन्नः ४७ पुनश्च निष्क्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमंदैरिवसव्रीडै
रतएवमंदैरपटुभिरिवस्थितैरित्युत्प्रेक्षा मूलात्पापटुनिर्भाग्यामंदाः स्वुरित्यमरः अतोत्यर्थं नावभासमानोनप्र
काशमानः पूर्ववत्तनैवमितिभावः किंतुयशः त्वयाहृतोः द्वीपाजलोयोर्णववत्तदाभक्तान्सदृशस्वमन्दमाकारमभ
भिपन्नः प्राप्तइवस्थितइत्युत्प्रेक्षा तस्याश्च द्वीपाजलार्णवाभत्वमुपमानं स्पष्टं हि ४७ इः शासनामर्षरजोवकीर्णोदेभि
विनाथैरिवभागपनाथैः केशोः कदर्थीकृतवीर्यसारः कच्चित्सएवासिधनंजयस्त्वं ४८ पुनश्चइः शासनस्यकर्त्त
रामर्षश्चाकर्षणं सएवरजोधूलिः मालिन्यहेतुत्वादितिभावः तेनविकीर्णो विक्षिप्तैरतएव विनाथैरिवभवनाम
सत्वप्रायत्वाद्दनाथैरिवस्थितैरित्युत्प्रेक्षा अन्यथाकथमियद्दर्पोतिभावः किंतुभागपनाथैर्दैवमात्रशरणैरु
न्यथास्वरूपमपिलुप्यन्तइतिभावः एभिः परिदृश्यमानैः संयमितैरितिभावः कीदृशैः केशैः कुत्सितं यत्कदर्थ्यः

स्प

कि॰
रु॰टी॰
४

अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः कोःकन्नत्पुरुषेचेतिकुशब्दस्यकदादेशः कदर्थीकृतोगर्हितोर्थीकृतोवीर्यसारो
शौर्यबलंयस्यसतथोक्तः इत्थंपूर्वविलक्षणात्वसएवधनंजयोसिकश्चित् कश्चित्कामप्रवेदनइत्यमरः सएवचेन्नैवम
स्मानुपेक्षस्वइतिभावः ४८ अथोपेक्षणीयदोषमाह विशेषकं सक्षत्रियस्त्राणसहःसतांयस्तत्कार्मुकंकर्मणियस
यस्यशक्तिः वहन्द्वयीमप्यफलेर्थजातेकरोत्यसंस्कारहतामिवोक्तिं ४९ क्षतात्त्रायतइतिक्षत्रंक्षत्त्रीयकुलं सुपीति
योगविभागात्कप्रत्ययः तत्रजातःक्षत्रियः क्षत्राद्घइतिघप्रत्ययः कर्मणिप्रभवतीतिकार्मुकं कर्मणउकञ्प्रत्ययः एवंस्थि
तेवाकार्थःकथ्यते यःसतांसाधूनां सहतइतिसहः पचाद्यच् त्राणस्यसहस्त्राणसहः रक्षणक्षमः सएवक्षत्रियःक्षत्रि
यशब्दवाच्यः तथायस्यकार्मुकस्यकर्मसुरणक्रियासुशक्तिरस्तीतिशेषः तदेवकार्मुकंकार्मुकशब्दवाच्यं अन्यो
शब्दोमुख्योनान्यत्रइत्यर्थः एवंस्थितेद्वयींद्विविधामपि क्लिंष्टाविमोक्षत्रियकार्मुकशब्दावित्यर्थः अफलेसर्वकार्याक्ष
मेऽर्थजातेस्वाभिधेयेसामान्यजातिमात्रइत्यर्थः जातंजातौचजन्मनीत्यमरः वहन्दर्शयन् असंस्कारहताममृतिह
षितामिवकरोतीत्युत्प्रेक्षा तस्मात्वमप्यसमर्थत्वान्नोकृतोपादात्मानंमोचयस्वेत्यर्थः ४९ अथत्वद्गुणाधीनो
जैवेत्युक्तिमाह वीतौजसःसन्निधिमात्रशेषाभवत्कृतांभूतिमवेक्षमाणाः समानदुःखाइवनस्त्वदीयाःसरूपतां
पार्थगुणाभजन्ते ५० हेपार्थवीतौजसोनिष्प्रभाःसन्निधिमात्रशेषाःसत्तामात्रावशिष्टाः भवत्कृतांभवताकरिष्यमा
णां आशंसायांभूतवच्चेतिभूतवत्प्रत्ययः भूतिमभ्युदयमपेक्षमाणाःत्वदीयागुणाःसमदुःखाःसमदुःखभा
जइवनोस्माकंसरूपतांवीतौजस्त्वादिवसाधर्म्यंभजन्तेइवेत्युपमा समानदुःखादिवेत्युत्प्रेक्षायावीतौजस्त्वादस्तं
भाविकतयानुप्राणितेत्यनुसंधेयं ५० तथापिममैवकोयंभारइत्यत्राह आक्षिप्यमाणंरिपुभिःप्रमादान्नागैरिवा
लूनसटंमृगेन्द्रं त्वांधूरियंयोग्यतयाधिरूढादीप्यादिनश्रीरिवतिग्मरश्मिम् ५१ प्रमादात्प्रज्ञाहानिवशात्तदौर्बल्या
दितिभावः रिपुभिराक्षिप्यमाणमतएवप्रमादान्नागैर्गजैः कुञ्जरगजहाभाहिगजानागाइतिवैजयन्ती आलूनस
टंआक्षिप्तकेसरं सटाजटाःकेसरयोरित्यमरः मृगेन्द्रमिवस्थितंत्वामियंधूःकार्यभारः तिग्मरश्मिंदीप्यादिनश्री

प्र=

कि॰
टी॰

रिवयोग्यतया निर्वाहकतया ऽधिरूढा ऽऽरूढवती करोति किं तदधीना इति भावः ५१ एवं निर्व्यवसायस्य द्रत्रियं प्रमादिनो दोषमु
क्त्वा संप्रति व्यवसायिनो गुणमाह करोतीति यः शेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभिः संसत्सु जातेषु गुरुषु अधिकारेषु स्व
त्तीनं समुपैति संख्या ५२ यः पुमान् शेषजनादतिरिक्तां अधिकां सर्वातिशायिनीमित्यर्थः संभावनां योग्यतां क्रियाभिरर्थव
तीं अर्थवतीं सफलां करोति तं पुमांसं संसत्सु सभासु सभा समितिः संसदित्यमरः गुरुषु अधिकारेषु गुरुषु गणनाप्रस्तावे जा
तेषु सति स्वयं तेऽनयेति पूर्वाणी संख्या द्वित्रादि संख्यान समुपैति अद्वितीयो भवतीत्यर्थः तस्मादस्या सा धारणत्वाभाय त्वर
या पि महानुत्साहस्त्वास्थेयः इति भावः ५२ अथ द्वाभ्यामर्जुनस्य खलु भविष्यत्तस्य विजयाय प्रेषितस्य कर्तव्यमनुप
दिशति प्रियेषु यैः पार्थ विनोपपत्तेर्विचिंत्यमानैः क्लममेति चेतः तव प्रयातस्य जयाय यत्तैर्न क्रियादच्छानां मया विचारतं
५३ हे पार्थ प्रियेष्वस्मासु विषये उपपन्नेः कारणादि नैव विचिंत्यमानैः कस्मादेवाशंक्यमानैर्यैः चेतः क्लमं खेदमे
ति जयाय प्रयातस्य तव संबंधिनामेषामस्माकं व्यसनानां दुःखैर्नो व्यसनेषु यमिति वैजयंती मयवा योऽस्माभि
रुपास्यत इति भावः विचारं तं निवारणां क्रियात्करोतु आशिषि लिङ् लोटौ वित्याशिर्षार्थे लिङ् तस्मादस्मच्चिंतया न चेतः
खेदयितव्यं जयार्थिना त्वया अन्यथा तदसंभवादिति भावः ५३ मा गाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेपि
देशे मात्सर्यरागोपहतात्मनां हि स्खलंति साधुष्वपि मानसानि ५४ असंबाधे संकटे विजनरत्यर्थः संकटं नात्संबा
धरत्यमरः शिवे निर्बाधे निर्भये द्वयोरन्यतरविशेष्यविशेषणासमासः अस्मिन्नसंबाधशिवेपि देशे चिराय चिरमेकाकि
त्वात्मेचरश्च एकचरः एकाकी वसन् प्रमादं प्रज्ञादौर्बल्यं मागाः मासर गांलुङीति गादेशः नच निःस्पृहस्य ममाकिंचि
त्करः प्रमाद इति वाच्यमित्याह मात्सर्येति मत्सरएव मात्सर्यं दोषोरागश्च ताभ्यामुपहतात्मनां रागद्वेषदूषितस्वभाव
नां मानसानि मनांसि साधुष्वपि सज्जनविषयेषु स्खलंति विकुर्वंति अत्र प्रमादनिषेधलक्षप्रमादस्यापकारणो नार्यप्राप्ति
रूपकारणस्य व्यतिरेककारणासमर्थनं हि धर्मेण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ५४ निगमयति ॥
तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व प्रत्यागतं त्वास्मि कृतार्थमेव भुजोपपीडं परिरब्धुकामा ५५ तस्मा

कृत॰

कि॰

ट॰टी॰

७

न्कारणादाग्रहीद्ध्रुमहर्षेर्वचनं कुर्वन्नुतपस्यन्नित्यर्थः नोऽस्माकं मनोरथान्सफलीकुरुष्व अरिनिर्याताननेनोपायात्प्रतिष्ठापये
त्यर्थः प्रार्थनायां लोट् किंच कृतार्थीकृत्य प्रत्यागमने चत्वं त्वा मां द्वितीयादिति त्वामादेशः स्तनयोरुपपीडयति स्तनो
पपीडं सम्यक्संचोपपीडरुधिकर्षेष्वितिणमुल् परिरब्धुकामोयस्याः सा परिरब्धुकामा स्मि आलिंगितुमिच्छामीत्यर्थः तं
काममनसोरपीतिमकारलोपः प्राकृकार्यसिद्धेः ममदालिंगनमपिनप्रीतिदमितिभावः ५५ उदीरितांतामितियाज्ञसेन्यान
वीकृतोऽङ्गाहितविप्रकारा आशासयवाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ५६ सोऽर्जुनः कृष्णयाज्ञसेनस्याप
त्यं स्त्रीयाज्ञसेनी तयोदीरितां उक्तां नवीकृतः पुनरुद्घाटनेनतया प्रत्यारोपितोऽत एवोऽङ्गाहितो मनसिनिधापितस्तु विप्रका
रोयस्याः सातां वाचमासाद्य आकर्ण्येत्यर्थः उदीचीकाष्ठादिशं दिशस्तुककुभः काष्ठाइत्यमरः तिग्मरश्मिरिव दिदीपेजज्वा
लत्युकोपेत्यर्थः ५६ अथाभिपद्यपन्निवविद्विषः पुरः पुरोधसारोपितहेतिसंहतिः बभारसम्योपिवपुःसभीषणागतः क्रि
